No. ५८८-घ

Title चन्द्रालोक प्रकाशः शारदागमः

Author प्रद्योतन भट्टाचार्यः


Extent २८ Age

Subject अलङ्कार शास्त्रम्

चान्द्रालोकप्रकाशः पूरदानमोवा
चंद्रालोकटीका

५७४

26


खड्गबन्धः

१ १

चं. लो.
टी.

ॐ श्रीगणेशाय नमः ॥ दृप्यद्दीप्तीनपक्षान्न च वहति नभस्तूणतां मुक्तमाक्रान्त्यालिप्रदेशपयोगं यद् धत्ते दिशादिशः किं त्वनैवाव
काशमू कुर्यां किं वानुकुर्यां त्रिपुरविजयिनस्ताण्डवे चिन्तयेत्यव्यग्रः सर्गादिहेतुस्त्रिदशगणनुतः श्रेयसे भैरवोऽस्तु १
मम सहजविरोधी निर्जितोनेन नाभित्वा धनुरिति वकुलाय प्रीतिभाजा स्मरेण स्वामीव कुवलयानामादरेणोपनीता जय
ति जनकजाया प्राचवेपाङ्गदृष्टिः २ प्रस्याप्यितो तु नरी महतो योध्याभवमखिला इति रघुवंशादधिको जयति वन्द्यो लाभि
घो वंशः ३ देवपतेरिव शक्तिर्यस्य जयेभ्रमन्तां प्रपिता श्रीवीरसिंहदेवस्तत्र धरामण्डले जातः ४ दशरथतो रघुपतिरि
व तस्मादिह वीरभानुभूपालः प्रावर्द्धधर्महेतुर्जगति समुद्रे समुद्भूतः ५ तत्तनयो नयनिर्मलकीर्त्तिः स्वनिर्म[illegible]कम
लम् श्रीरामचन्द्रदेवो दूषणहन्ता समुल्लसति ६ श्रीभद्रदेवो [illegible]रिवप्रणीतसत्कीर्त्तिः जयति तदीयस्तनयः कविगोष्ठीदे
वतारामः ७ क्रियते तस्य निदेशाच्चन्द्रालोकप्रकाशोऽयं शरदागम इति विदितो भट्टाचार्येण यत्नेन ८ विधूविधंसकामन
याकृतं मङ्गलं शिष्यशिक्षायै निबध्नाति उच्चैरिति महारुद्रनेत्रपदे सूर्यरूपं चन्द्रः मन्दतामरसतामुच्चैरस्यति सूर्यस्य तामर
साह्लादकत्वात् तस्मिन्सति तामरसे मन्दत्वासम्भवात् चन्द्रात्मकं चन्द्र जीगत्कलङ्कं यथा स्यात्तथा केरवध्वंसं हसत्ययते दू
रीकरोति चन्द्रे सति कुमुदाह्लादस्य जायमानत्वात् प्रमितिरूपन्तु ध्वष्ठ उद्यान् योमदनः सस्वाशनं यत्र ताहृगक्षिः वामदे

वतापक्षे मन्दत्वमरसत्वं च उभे ः दूरीकरोति वाग्देवतायाममन्दत्वसरसत्वयोर्भावात् या च जाग्रत्कलङ्कैः प्रकटैर्दोषैर्यो
बद्धं सो वचनाभावत्वमपाकरोति तस्याः प्रसादेन दोषानपास्य वचनप्रयोगस्य कर्तृशक्यत्वात्से दोषान्निरोभवि
घ्नन्तीति भीत्या हि दोषज्ञाने तु निरासोपायाज्ञाने च वचनप्रयोगो न च भवति वाग्देवताप्रसादात्तदुभयज्ञाने तु भवति
निरवद्यो वचनप्रयोग इत्यर्थः ध्वस्तोद्यन्मदयेत्यानं विनैव गर्वखर्वगर्वयवभाजस्तत्राशन्तर्ध्वस्तेषामस्याः प्र
भावादपगमो भवतीत्यर्थः वाग्देवताहरने त्रयोरमलत्वं समानमेव लोकप्रकाशकत्वं च वाक्यदेसुमनसां मानसोउ
ल्लासिनी सकलशास्त्रज्ञानाहितदुर्षां मानसाह्लादिनी हरनेत्रपक्षे स्वर्येसति या गाधाचरणात् व ह्नौ च नेत्रेणापि हृष्याधाना
त् १ हं हो इति चिन्मया ज्ञानशालिनो ये तेषां चित्तस्वरूपाश्चन्द्रमणयोरत्रासंवद्धयद्धं निर्विचारकवितेस्वैरिणि ना
नाजनसाधारणत्वात् अस्मत्काशीभवमा अत्रोभयत्र हेतुः चन्द्रेति चन्द्रोदये चन्द्रमसोः हरणात् अभिसारिकाभिर्ग
तिस्यागात् ग्रन्थस्य प्रयोजनमाह उल्लासयेति विचार एव वीचिनिचयायत्रेति ताहृशादलङ्काररससमुद्रस्येत्यर्थः एतावतालं ५
ङ्कारलक्षणमभिधेयं तेन प्रतिपाद्यप्रतिपादकभावः संबन्धः रसवद्ध्यादिः प्रयोजनमिति भावः २ प्रयोजनक
थनेन पण्डितानस्मिन्प्रवर्तयति युक्त्येति युक्तिर्व्याख्याद्यलसदृसस्य तयोरित्यर्थः अन्यत्रालङ्कारग्रन्थे एताहृशी युक्ति

२२

चं॰ लो॰ टी॰

नास्तीत्यर्थः साहित्यसैन्धवसारस्वतमेवक्षीरमित्यर्थः अन्यान्तरापेक्षपात्रगांभीर्यमाह अगाधतामिति अतएव सेव्यः एतादृ
शशास्त्रसमाश्रयणफलमाह श्रीरिति श्रीर्धनं सरससन्निषेवनेन कान्तिश्च एतत्पाठेन स्वयमन्येषां गुरुरपि भवतीत्याह उपदे
शेति उपदेशस्य पीयूषत्वेन शिष्याणां प्रवृत्तिरुक्ता अन्यग्रन्थतोयशास्त्रज्ञोऽप्येतत्सेवनेन समीचीनो भवतीति जाग्रदिति ३ ऐदं
त्वमपि हरति तमिति अन्योर्विन्नसरणेः सूर्यकिरणे जालान्तर्गते प्रकाशत इत्यर्थः ४ अपाततः पूर्वाचार्यमतदूषणदूष
कतया प्रतीयमानापि मधुक्तिरनौचितीम्मार्हिनीत्यत आह नाशङ्कनीयमिति दोषोद्भावनेनाविचारकाणां तत्र सिद्धान्ते स्फुरत्तेजा
यमानत्वात् इत्यर्थः ५ काव्यहेतुमाह प्रतिभेति कवित्वबीजभूतः संस्कारविशेषः प्रतिभा सैव श्रुताभ्यासावासाद्यबीजं मृदा
दिसहितं लताम्निव कवितां सूत इत्यर्थः ६ काव्यलक्षणमाह निर्दोषेति अथोन्यत्र काव्यतयोक्तोऽत्र कथमुपेक्षित इति चेन्न निर्दोष
त्वेनैव सार्थकत्वलाभात् निरर्थकस्य सदोषत्वात् वृत्तिर्द्विधा मधुरादिरूपा फलरूपा व्यञ्जनादिरूपा त्रिधेति बोधेन वृत्तावनेकत्व
विशेषणं दोषादीनामनेकत्वसूत एव ज्ञातव्ये शब्दार्थौ काव्यं तत्र च क्वचिदनलंकारत्वेपि न दोष इति कस्यचिन्मतमपाकरोति ७
अङ्गीकरोतीति यः कृती अनलङ्कृती शब्दार्थौ काव्यमङ्गीकरोति सोऽनलमनुष्णं कस्मान्नाङ्गीकरोतीत्यन्वयः अग्नेरनुष्णताङ्गी
कारतुल्यो सावङ्गीकार इत्यर्थः अलङ्कारवदेव काव्यं तस्य तु क्वचिदस्फुटत्वेपि न काव्यत्वहानिरिति तत्त्वं निर्दोषत्वादिविशेषणानिभूतं
निरूपयितुं विशेष्यभूतं तावल्लक्षयति ८ विभक्तीति शास्त्रीयशब्दत्वं लक्ष्यतावच्छेदकं भेरीशब्दादौ जातिव्याप्तिः एतावता लिङ्ग-

धातुत्वपाप्रकृतिंशब्दः तस्यैव विभक्तियोग्यत्वादित्यर्थः अस्यैव त्रैविध्यमाह रूढेति रूढो यौगिकलक्षितश्चेत्यर्थः ९ यथा यत्ति विधइ
त्याह प्रकृत्यैति प्रत्ययमात्राद्यः योगोऽवयवशक्तिः रूढिः समुदायशक्तिः तत्राव्युत्पत्तियोगो रूढः यत्राविद्यमानोऽपि योगार्थः न प्रती
यते यथा वृत्तइति प्र चक्षुस्त्यात पमिति विद्यमानोऽपि योगो न प्रतीयते वृत्तस्यैव प्रतीतेः तस्य जातिरूपत्वात् निर्योगो यत्र योगो न संभवत्ये
व यथा भूवादिः अत्र पाणिनेः संकेतशब्दोऽयं धातुषु भूवाद्यो धातव इति पाणिनिस्मरणात् न च भरादिर्येषामिति बहुव्रीह्या भूवादिशब्दो नि
ष्पद्यते भ्वादय इति प्रसङ्गात् नापि भश्च वाश्चादिर्येषामित्यनया निष्पन्नोऽपि धातुप्रतिपादकः धातुषु तदादित्वाभावात् तस्माद्रूढ एवायं शब्दः
धातून् प्रतिपादयतीति सिद्धे योगाभासो यत्र योगार्थः प्रकृतेऽर्थे नान्वेति विद्यमानोऽपि यथा मण्डपशब्दस्य गृहरूपेऽर्थे मण्डं पिबतीति
योगार्थः १० यौगिकोऽपि त्रिविध इत्याह शुद्धेति तत्र प्रकृतिप्रत्ययोत्पन्नः शुद्धो योगः यथा भान्वादिशब्दः यौगिकशब्दयोः समासः
केवलं प्रतिनिष्पाद्य सम्मूलो यौगिकमूलः यथा भास्करकान्तिरित्यादि कुन्तीत्यशुद्धो योगः कुन्तीशब्दाद् यौगिकनिष्पन्नः कौन्तेयशब्दः
संभिन्न इत्यर्थः रूढयौगिकमाह ।। तन्निग्रह इति । विशेषस्य सामान्यमायाः सामान्यस्य च विशेषतया योगरूढे साश्रयएकारणवशेना
न्योन्य सामान्यविशेषपरिवर्तनमेकमेवायं भेदः तत्र नीरात्पिबतीति सरः प्रभृति साधारणतया सामान्यस्य समुद्रपरत्वे विशेषपरिवृत्तिः
पङ्क-जपदे पङ्क-जनामादि साधारणे कमलपरत्वे सोऽधशब्दे सुधासंवन्धपदार्थान्तरसाधारणेऽपि रूढविशेषपरत्वे सागरसंवन्धिपदार्था
न्तरसाधारणत्वे समुद्रपरत्वे महहपदे सजातपदार्थान्तरसाधारणेऽपि त्वपरत्वे शशिनि शशाधारस्य साधारणे चन्द्रपरत्वे सा

३ 3
चं. लो. टी.

मान्यपरिवृत्त्यायत्तिध्यतिनदाह १२ क्षीरेति अत्र नीराणि दधतीति विशेषणमाश्रयणे क्षीरेत्याह तस्मात् सामान्यसमुद्रग्रहणे तुना
नुपपत्तिरित्यर्थः ननु पङ्कजशब्दस्य विशेषपरतायां कमलनिष्ठस्यापि कथमाकाशपङ्कजमिति सिद्धिः तत्राप्याकाशप्रभ
वत्वाभावादिति चेन्न आकाशसंबन्धमात्रेणाकाशपङ्कजमिति प्रयोगात् यद्वा मन्दाकिन्यादिवर्णनीयकमलाभिप्रायेण तथा
प्रयोगः एवं सौधस्य गृहमात्रपरत्वे कलधौतसौधः सागरस्य समुद्रमात्रपरत्वे क्षीरसागरः भूरुहशब्दो वृक्षमात्रपरत्वे सुरभूरुहः
शशलाञ्छनशब्दस्य चन्द्रमात्रपरत्वे निःकलङ्कः शशलाञ्छन इति सिध्यति शशलाञ्छनत्वविशिष्टपरत्वे तु व्याघात एवस्या
दित्याशयः शब्दरूपां वाचं लक्षयित्वा पदादिरूपां लक्षयति विभक्त्यन्तमिति पदं विभक्त्यन्तं अर्थसमाप्तौ पदव्यूहो वाक्यं सपद
व्यूह एव खण्डवाक्यं तात्पर्यसमाप्तिं विना समासस्य लीयांयुक्तार्थानां तां च किंनात यथा च अप्रलक्ष्म मासोपि न खण्डवाक्यमिति
शास्त्राशयः समासान्तरे पदसमूहत्वाभावात् वाक्यत्वं खण्डवाक्यत्वं पदैक्येपि क्वचिदस्तीत्याह वाक्यमिति १४ क्रमादुदाहरति धूम
वत्वादिति अत्रैकस्यैव विभक्त्यन्तस्य सत्वान्न पदसमूहहेत्वाकांक्षानिवर्तकविशिष्टार्थप्रतिपादकत्वाद्वा वाक्यत्वमित्यर्थः देवेति
अर्थसमाप्तेरभावादित्यर्थः वाक्यानीति एकार्थानुच्छिन्नो वाक्यसमूहो महावाक्यमित्यर्थः श्रीवीरभद्रभूपतिनिर्देशात्सामान्तत्वेन
प्रथमस्तबकरचितः चन्द्रालोकप्रकाशोयम् इति श्रीमहाराजाधिराजश्रीरामचन्द्रदेवात्मजयुवराजश्रीवीरभद्रदेवादिष्टमिश्रवल्लिभ

ज्ञात्मजसकलशास्त्रारविन्दप्रद्योदितमहाचार्यविरचिते चन्द्रालोकप्रकाशे शरदागमे प्रथमो मयूखः समाप्तः श्रीवीरभद्रदेवोद्दिष्टा
तु अयं संगरप्रकरे सीतावतारशालीकालीयोत्सादनातुरः त्यज्यतया दोषानथमाह स्यादिति चेतसि विशता येन रमणीनां नश्यति सदो
षः स च शब्दार्थगतत्वेन द्विविध इत्यर्थः श्रोत्रखेदकमः श्रुतिकटुरित्याह भवेदिति यथा त्रैवृक्ष्णातीरितिपदमिति भावः संविद्रत इति व्या
करणविरुद्धं च्युतसंस्कृतिः संविद्रत इत्यर्थः संविद्रत इत्यत्र संपूर्वे त्वेप्यात्मनेपदमसाध्वित्यर्थः अकर्मकस्यैव तद्विधानादिति भावः अ
प्रातमप्रयुक्तं विभिरनाहृतमप्रयुक्तं यथा दैवतशब्दः पुल्लिङ्ग इत्याह अप्रयुक्तमिति दैवतानि पुंसि वेति सत्त्वात् अभिप्रेतमर्थं वक्तुम
समर्थमसमर्थं यथा गच्छतीत्यत्र हन्तीत्याह असमर्थमिति तदेव छन्दोवशात् तयोदाहरति स इति सकान्तः कन्तारे हन्ति गच्छतीत्यर्थः हन
हिंसागत्योरिति धातुपाठे सत्यपि न समर्थमिति भावः प्रसिद्धेनाप्रसिद्धार्थे हतो निहतार्थो लोहितमिति व रुध्यैणोणितमिति दर्शयति निह
तार्थमिति अत्र रुधिरेणारागस्य निहतिः नेह च्युतसंस्कृत्यसमर्थयोर्वाचकत्वेऽपि क्रमेण व्याकरणकविसंप्रदायविरोधः अर्थाश्रयत्व
निहतार्थे च्युतसंस्कृते तु शब्दाश्रय इत्याशयः निहतार्थे तु वाचकत्वमेव नास्ति इति निहतार्थासमर्थयोर्भेदः एकान्तरे वर्णनप्रयोगः
कचिदेव सुन्दर इत्याह एकान्तरमिति इयमिति अत्र वानरीरूपकवशात् कामिन्याः वैरूप्यमनुचितं प्राप्यते केवलपादपूरणप्रयोजनं
तु हीत्यादि निरर्थकमित्याह निरर्थकमिति यथा तलं भूलतादमात तलमितिवत् खतलं कुलतेत्यादि न शोभनमित्यर्थः अनुचितार्थमाहव्य
ननीतनदेवानुचितार्थमेवोदाहरणदुर्गसंसर्गेण यो धातुर्यत्रार्थे वाचकस्तस्मिन्नर्थे विनैव प्रयुक्तोऽवाचक इत्याह ६ अर्थ इति उदाहरणं

४ ५
चं. लो. टी.

यत्रेइति इदंकरोतीत्यर्थे वाचकं एवंधत्तइत्यर्थेविधत्तेइत्यपिव्रीडादिरूपतया त्रिविधमश्लीलमित्याह अश्लीलमिति आह्लादेति
साधनवायुनाशशब्दाः पुरुषावयवविशेषस्यापीरविशेषक्रियास्मरणप्रतिपादकाः अर्थद्वयप्रतिपादकं संदिग्धं यथा यान्न
यान्ति नदीरूपेदेशेवायायांवीत्यर्थद्वयप्रतिपादके नद्यामितिशब्दइत्याह स्यादिति यत्पदं शास्त्रमात्रप्रसिद्धं ततः प्रतीतं यथा वीता
दिपदमनुमानविशेषप्रतिपादकमित्याह स्यादिति उदाहरणेनैवशिथिलंप्रपञ्चयति शिथिलमिति एवंविधानांशिथिलत्वेश्रवणमेव
प्रमाणमित्यर्थः मञ्जुत्तेशयनेलिल्येकिंभूतेपशिथिलिथिइत्यर्थः मलादयःशब्दाग्राम्याइत्याह मलेति भयोभिः शब्दैर्लक्षणाश्र
यणेनयत्रार्थः प्रतीयतेतन्नेयार्थमित्याह नेयार्थमिति अत्यन्तप्रसरादमनोहरालक्षणायाबहुपदाश्रयणेंधिकारजागरेयामिकाइत्य
नेनामनोहरत्वमात्रलाभात् यत्रभूयस्यार्थपरम्परयास्वल्पोर्थः प्रतीयतेबहुभिःपदैः तत्क्लिष्टं यथा नदीतिवक्तव्ये हरीत्यादीत्याह ।।
।क्लिष्टमिति यत्रसमासेनविधेयताच्छाद्यतेसोविमृष्टविधेयांशइत्याह अविमृष्टेति ।विशोन्तीति अत्रद्विशिरवबद्धिशन्तीतिविधेयंत
त्वप्रकृतसमासेनप्राप्यतेविशिष्टकटाक्षयोःसाम्यमात्रंतुप्राप्यतइत्यर्थः यत्राविरुद्धामतिस्तद्विरुद्धमतिकृदित्याह अपराधसइति
यत्रनपराधीनइतिविवक्षितंनअपराधीतिचप्रतीयतेइत्यर्थः प्रकृतानुचितवर्णप्रतिकूलत्वं यथा वीरकोमलवर्णइत्याह रसेति
विसर्गोपधत्वोत्वंप्राप्तः सउपहतविसर्गः यत्रचलुप्तः लुप्तविसर्गः इत्याह यस्मिन्निति उदाहरणमत्रैव उपहतविसर्गइहेतिचरमोदा

हरणं कुसंधीति पदोऽत्रागच्छेत्यत्रपदवागच्छेतिसंधेर्मनोहरत्वमित्यर्थः। विसंधीति स्वेच्छयाविसंधिः सकृदपिदो
षः सोऽत्रस्त्वसकृदितिभावः यत्रछन्दोऽश्रव्यताभवति तद्धतवृत्तमित्याह १६ हतवृत्तमिति अत्रोदाहरणेछन्दोलक्षणल
क्षितत्वेपिपश्यामरमित्यत्र पूर्वस्वरेणोत्तरस्वरस्यग्रस्तत्वात्काचिदश्रव्यताभवतीतिभावः १७ न्यूनमिति अत्रयशसः
पुष्पत्वमिवखड्गस्यलतात्वमपेक्षितं तन्न्यूनमिति न्यूनमित्यर्थः अधिकमिति अत्रास्फटिकाणीत्येतावतैवचरिता
र्थत्वेलतेत्यधिकमित्यर्थः कथितमिति पुनरुक्तेति श्यामपदस्यद्विरुपादानादित्यर्थः विहतमितियत्तुदूरविकृतेः म
हतीधात्वादिविकारान्निष्पद्यते तद्विकृतं यथारेयरुदिति एषकटित्यर्थः प्रत्याय्यकतयादोषइतिभावः प्रारम्भेस्वीकृत
स्यानुप्रासादेरग्रेत्यागेपतत्प्रकर्षमित्याह पतत्प्रकर्षमिति गम्भीरेतिअत्रपाणिरित्यादिन्यनुप्रासत्यागात् समाप्तेति
उक्तेतीत्यन्तेनवाक्यार्थेसमाप्तेपुनस्तदन्वयसोविशेषणोपादानं समाप्तपुनरात्तमित्यर्थः यत्रैकस्मिन्नर्द्धेऽर्द्धान्तरपदापेक्षा
भवति तदुक्तमित्याह २१ अर्द्धान्तरपदेति अत्रहिपूर्वार्द्धे उत्तरार्द्धपदापेक्षा अर्द्धान्तरमर्द्धनारीश्वरशरीरस्यगौरीभागस्तत्पदा
पेक्षीतत्स्वरणापेक्षीयक्रीडान्तिकं तत्रमोचारम्भत्रातएवसहितमित्यन्वयेनोत्तरार्द्धवर्तिनोमोचारम्भपदस्यपूर्वार्द्धेनापेक्षणा

४5

चं॰ लो॰ टी॰

त्र

तस्य भागस्य न्यूनत्वेपि न कृत्रावपि पदाम्नातादि नागेशीभागोनन्त्येन न्यूनत्वेन पदामोद्धारम्भ तेत्यर्थः एतावताते न संपूर्णेन पद्येनोदाहरणं यत्रे
षुन्वयोनन्निर्वहति तत्राभवन्नतयोगङ्गत्याह अभवदिति येनेति यत्रोत्तरार्द्धे स एव लङ्कापतिः कारं रावणं हन्तुमुद्यतः अत्र रामस्येति पदं य
स्येति विशेषणेनान्वितं येनेत्यनेन नान्वेति विशेषणं परस्य रमन्त्वयादित्यर्थः सङ्कुति विशेष्यनिकटे पठ्यमाने सर्वान्वितं तस्मात् विशेष्ये
सर्वविशेषणानामन्वयादित्यर्थः द्विषामिति अत्र द्विषामित्यादौ शौर्यवर्णने उचितोपि समासो न कृतो विद्वज्जनमनोरमम् इत्यत्र तु कृतः इ
त्यर्थः तस्मादत्रानस्थानस्थसमासं दूषणमितिभावः अन्यवाक्येऽन्यवाक्यपदप्रवेशं संकीर्णमित्याह मियइति अत्र [illegible]न्वावितस्य व
क्त्रस्य रात्रिवाक्ये पठनात्संकीर्णमित्यर्थः एवमन्यत्रापि वाक्ये वाक्यान्तरप्रवेशो गर्भितमित्याह २५ ब्रह्माण्डमिति अत्र भ्रमि मूषणं श्रा
कर्णयेति भिन्नं वाक्यं ब्रह्माण्डेति वाक्यमध्ये प्रविष्टं आरब्धधाराद्यनिर्वाहे भग्नप्रक्रममित्याह भग्नेति अत्र पूज्यन्ते नम्यन्ते इति धातुभेदः
अक्रमो व्यक्तैव लक्षितः त्वमेव नम्यन्ते देवताः पूज्यन्ते इति क्रमानिर्वाहात् तथा वाकरणात् अमतार्थान्तरमाह अमतेति यत्र प्रतीयमानमर्था
न्तरं मुख्येनामुख्येन वार्थेन विरुद्धं तदमतार्थान्तरमित्यर्थः उदाहरति त्वक्तेति अत्र कान्तवृत्तान्तपरिस्फूर्तिर्भवति सा चानुचिता शोकाधिक्य
दृश्यायां तस्याप्रस्तुतत्वादितिभावः अर्थदोषेष्वपुष्टमाह अपुष्टइति यत्र विशेषणेन कश्चिदतिशयो नाधीयते विशेष्ये तत्रापुष्टोर्थतायथाविशं
ती त्यादौ न हि रविकृतनविष्टस्यापनेन कटाक्षाणां हृदयप्रवेशानुकूलः कश्चिदतिशय आधीयते शार संनिभा इति तु सम्यगिति भावः ॥ कष्ट

माह कष्टइति वाचिग्रसंनिभोसाकल्योर्थः स्पष्टावबोधार्थमक्षमः सकलइत्यर्थः यत्र विद्यमानोप्यर्थः स्पष्टप्रत्ययाभावे नासन्नि
वतत्र कष्टता यथा तत्रैव वाचिग्रसंनिभ इतिमहतायासेन प्रत्ययाविति भावः ३० व्याहतइति अर्थयोर्विरोधे व्याहतः यथा सहले
त्यादौ अत्र कमलमित्रत्वेनोपमप्राप्तैवेति केनोपमीयत इत्यानन निषेधोनुपपन्न इति भावः सकलश्लोकेन पुनरुक्तोप्युदाहृतः केनोप
मीयत इत्यनेनोपमानिषेधानन्तरं कृतस्तत्रोपमेत्यनेन निषेधात् त्वङ्गत इत्यत्र दुःक्रमः भक्तिफलस्य स्वर्गस्य प्राग्निर्देशाद्हेत्वात् ९
कमित्यादौ ग्राम्यं स्फुटमेव ब्रूत इत्यादौ प्रकरणाद्यभावे शान्तशृङ्गारान्यतरपरत्वसंदेह इत्याह दुःक्रमामिति अनौचित्यमिति लता
यां पल्लवयन्तीत्यनुचितं ३४ विरुद्धमाह न्यस्तेति प्रतापस्य धवलत्वप्रसिद्धिविरुद्धं आरक्तत्वेन वर्णनात् केतकीपूजा च शंभो पुराणवि
रुद्धेत्यर्थः ३५ सामान्येति केतकीति सामान्येवक्तव्ये कुण्डलेति विशेषाभिधानात् सामान्यपरिवृत्तिः विशेषेति प्रियेति विशेषे श
ब्देवक्तव्ये वनितेति सामान्योक्तिर्विशेषपरिवृत्तिरित्यर्थः ३६ एकः सहचराचारः परस्परविरुद्धोन्योन्यसंगतिर्दोष इत्याह तथेति धांत
इति ध्वान्ताख्यस्य स्वपरपुत्रभेददृष्टिशून्या इत्यर्थः अत्र काकसाहचर्यं सतां नरस्यमित्यर्थः ३७ सरोजेति नेत्ररूपस्य सरोजस्य मु
खरूपस्येन्दोश्च संगतिर्विरुद्धा गोत्रस्य हितीयार्थमर्यादया पुरन्दररूपकं च विरुद्धं पुरंदरस्य गोत्रभिदो गोत्रपालकत्वासंभवादित्यर्थः ३८
दोषान्तरमाह पदमित्यादि ३९ दोषाङ्कुशलक्षणमाह दोषमिति यो निपतितमपि दोषं स्वशास्त्रन्यतया प्रसरन्तं निवारयति स दोषाङ्कुशः
तन्निवारणं त्रेधा इत्यर्थः ४० त्रैविध्यं दर्शयति दोषइति क्वचिद्दोषो गुणो भवति क्वचिद्दोषत्वं मुञ्चति गुणत्वं तु न याति क्वचित्पतेत

६ 6
चं. लो. टी.

मपि दोषं स्वीकारयति स दोषांकुश इत्यर्थः ४१ आद्यमुदाहरति मुखमिति अत्र खेतेत्यादि ग्राम्यापि वर्णनागुण एव हास्यर
सपोषकत्वादित्यर्थः क्षीरोदधि प्रसूतश्चन्द्रोऽत्रिनेत्रसमुद्भूत इति पुराणप्रसिद्धिः सापि द्वयमप्यापि कलङ्कि
त्ववर्णनेन न दोषः कविप्रसिद्धमाह योम्बुजमसौरेक्याध्यवसायादित्याह तवेति अत्र हृत्यश्चन्द्रस्तपोत्त्वरयतीति भावः ४३ तृ
तीयमुदाहरति दधारेति अत्र कामपत्नीर्हिकारस्य वैयर्थ्येपि रंभुनाश्लेषनिर्वाहायोपादानं कान्ता हृदये प्रियमनन्यथयोर
पिश्यिते ४४ श्रीवीरभद्रदेवादेशादुदित प्रयत्नेन प्रथमाऽऽमोमयूखश्चन्द्रालोके कृतः सार्थः इति श्रीमहाराजाधिराजचन्द्रदेवा
त्मजयुवराजश्रीवीरभद्रदेवादिष्टमिश्रश्रीबलभद्रात्मज सकलशास्त्रारविन्दप्रद्योतन भट्टाचार्य विरचिते चन्द्रालोकप्रकाशे
द्वितीयो मयूखः २ यस्याः स्नयाविधत्ते महाचार्यः स्वभांटीकां हार्दिक्कु संवृतार शाली शर्मादि शतु प्रभोस्तस्य अथ अलङ्कारानेतत्रा
दावक्षरसंहतिं अल्याक्षरेति ७ बेति अत्रामुना विशेषणेन स्वल्याक्षरैरेवोषापरिणायेवा गुणरेव तं भगवतः पौरुषं स्मारित
मेवं च स्वल्पैरेवाक्षरैर्यत्र वक्तृर्थप्रतीतिः साक्षरसंहतिरित्यर्थः १ यत्र गुणवर्णनेन प्रसिद्धदोषप्रतिषेधः सा शोभा यथा भग
वत्पदजालन्दनागुणवर्णनेन संसारदोषापाकरणमित्याह शोभेति २ ॥ ॥ ऊहितार्थप्रतिषेधको विचारोऽभिमानः यथेन्दु

रित्यादौ विरहिण्याप्रथममभिनुतत्वेन चन्द्रस्य कीर्तितस्यौचित्येन निषिद्धः पश्चात्तदूर्यत्वेन तत्किं तोरात्रिसंबन्धेनेत्याह २ अभिमान
इति हेतुस्तु पारिशेष्यपर्यवसन्नः यथानेन्दुरित्यादौ दहनसागरावुत्थित इत्यनेन चन्द्रादिनिरासे वह्नुवाग्नेयपर्यवसानादित्याह
हेतुरिति अत्र दहन इत्यनेन चन्द्रः सागरादुत्थित इत्यनेन सूर्यः प्रतिषिद्ध इति भावः ४ प्रसिद्धकारणानादरः प्रतिषेधः यथा
नेत्यादौ तत्र प्रसिद्धयुद्धानादरेण प्रसिद्धस्य स्यन्दाश्रयणादित्याह प्रतिषेध इति ५ निरुक्तमाह निरुक्तमिति नाम्नो निर्वचनं निरु
क्तं न हेधा सत्यं मिथ्या चेत्यर्थः प्रथमेदाहरं ईदृशैरिति अत्र दोषा रात्रिस्तत्कारित्वेनैव निर्वचनस्य व्याकरणेन कटितिसिद्धं सत्यत्वमि
त्यर्थः राजाप्रकृतिरञ्जनादिति तु मिथ्या निर्वचनं अनुमानानिर्वचनेनास्य प्रयोगस्य ग्रहणादिषु दुःसाध्यत्वादेवं च सुकरं
निर्वचनं सत्यमन्यन्नु मिथ्येति भावः ६ यत्र साध्यसाधनयोर्द्वयोरप्यसत्वं तन्मिथ्याध्यवसाय इत्याह स्यादिति चन्द्रेति अत्र साधनस्यांशो:
स्तत्रद्रूपेण सत्वं न भद्र त्वादेस्तस्वरूपेणैवेत्यर्थः ७ प्रसिद्धसाहचर्येण कीर्तनं तत्तुल्यतायै सिद्धिः यथा जलधिसाहचर्येण कस्यापि सु
वा मित्यादावित्याह सिद्धिरिति चामित्यस्यानामत्वेपि तत्प्रतिपादकत्वमस्तीति भावः ८ यत्रापूर्वार्थसंबन्धो नाभिलषितस्यावि
शेषस्य सिद्धिः सा युक्तिः नवद्रित्यादौ अत्र जलदानत्वरादष्टसुवर्णवर्णनीयेन नवनीरदत्वसिद्धिरित्याह युक्तिरिति ९ व्या

८ 7
च॰ लो॰ टी॰

पारादस्तु तो वा यत्र फलोपलम्भस्तत्कार्यं तस्य पूर्वस्योदाहरणमसाविति अत्रोदये लक्षणव्यापारे चन्द्रस्य कामिनीनां मानच्छेदलक्ष
णफलवर्णनादित्याह कार्यमिति १॰ मया कियन्ति लक्षणानि दर्शितान्यन्यान्यपि सन्तीत्यादिपदप्रयोगे लाह इत्यादीनि यथा स्वर्णश्रा
जिस्तु भास्वत्वादयः क्षितिपतेर्लक्षणत्वेन कीर्तिता इत्यर्थः श्रीवीरभद्रनृपतिलब्धनिदेशेन यत्नेन चन्द्रालोकमयूखा रचितः सार्थकत्वती
योपि इति शारदागमे द्वितीयमयूखः २ प्रतिभूपतिमतियशसो वीरश्रीवीरभद्रस्य वन्द्यः सुरासुराणां व्याजवराहः श्रियं दिशतु प्रथमगुणः
श्लेष इति योर्थो नघटते तेन तस्य केन चिन्निमित्तेन घटनागता वर्णनं सजातीयैः शब्दैः सुखावहो बन्धस्तु शब्दश्लेष इत्यर्थः उभयोरुदाहरणं
उत्सदिति अत्रमानवत्या आलिङ्गनं न संभवति संभावितं तु समुन्नतरोमसंवहशोभनागवपुः कम्पेन तस्याभयोर्द्वयोः इत्याद्युदाहरणं क्षिती
योदाहरणं न स्फुटमेव वर्णानां सजात्यादिति भावः २ यत्कुलात्तत्कस्यान्तः स्थितः सर्वोर्थो भासते स्वच्छसलिलस्येव प्रसाद इत्याह यस्मा
दिति उदाहरणमप्येतदेव ३ यत्र बहुसमासाभावः सा समता अन्यथोदाहृत एवं नयाति समासस्याभावात् वर्णसंख्यासाम्येन पदतुल्य
तावा समता श्यामलेत्यादौ पदद्वये अक्षरत्वेन तृतीयपदे द्व्यक्षरत्वेन प्रथमद्वितीययोः पादयोः साम्यात् श्यामलेत्यादौ प्रथमपदे आकार
वर्णसाम्याच्चेत्यर्थः न च प्रथमलक्षणपाठाच्छ्लागतं मत्र बहुपादेषु समासाभावस्येष्टत्वात् एकपादेपि समासाभावे समतानिर्वाहात् केवलस्वरसाम्ये
नानुप्रासाभावे न द्वितीयं नानुप्रासे यातीति भावः ४ समाधिमाह समाधिरिति सोर्थमहिमा समाधिर्येन लघुनरसात्मनां तेर्वोपि नागात्र मकुः मि ८

६

तं भवतीत्यर्थः यथा ममैव कैलाशाभिमुखे बुकेषु चिदुमामालोक्य शङ्काकुलां तर्प्पर्जीर्णविशेषणमस्त्वपतिनाद्रित्राणि गीर्णा हठात्
मालेद्दष्टिपथे न दुर्जरतया क्लान्ता नलाकुलत्वर्णा भयः पौलिवितापहुताशनमिषाद्यस्य प्रतापं प्रभावः एतदर्थप्रतीतौ रामोदूमे सहृदया एव
साक्षिणः ५ माधुर्यमिति पुनरुक्तस्य चारुतावहं वैचित्र्यमतादृशावेऽन्यत्र त्वपेक्षया वैलक्षण्यं माधुर्यमित्यर्थः उदाहरणं वयस्येति अत्र पश्य
पश्येति पुनरुक्त्या काचिद्रमणीयता भवति दर्शने प्रकर्षप्रतीतेः ६ ओज इति अर्थस्य प्रौढिरोजः सा चाविद्यमानेन केनचिदुत्कर्षाधायकरू
पेण वर्णनं त्वतिशयसौष्ठवस्य संक्षेपो वा ओजः उदाहरणं रिपुमिति अत्र करणस्य कर्तृत्वेन वर्णनात्प्रौढिः संक्षेपस्तु स्फुट एवेति भावः ७
पर्यायपरिवृत्त्या पारुष्याभावः सौकुमार्यमित्याह सौकुमार्यमिति सद्वृत्ति अत्राग्नौ प्रविश्य मरतु इति प्रयोक्तव्ये पर्यायाभिधानं साक्षात्तेन शब्दे
नाभिधाने कटिति अमङ्गलं प्रतीतेः पारुष्यमित्यर्थः वस्तुतस्तु तादृशैः शब्दैरेव पारुष्यः प्रविश्येत्यादि प्रवेशादिति ध्येयम् ८ वैदग्ध्यमुदारता
सा च न ग्राम्यत्वाभावे त्वर्थतेत्याह उदारतेति उदाहरणं मानमिति विलोकयेत्यु त्वा वपि न ग्राम्यत्वं लोचनान्तमित्यनेन तु वैदग्ध्यं ९ कान्तेः शृ
ङ्गारेण संग्रहः अर्थव्यक्तेः प्रसादेनेत्याह शृङ्गारे चेति क्वचित् शृङ्गारादाविति पाठः ननु दीप्तिः कान्तिरुदाहृता च प्रेयान्स्यायमित्यनेन स्थैर्या
नुभावसौष्ठवस्यानुभावस्य चात्र दीप्तेर्वर्णनादुज्ज्वलता च शृङ्गारे त्वर्थावकाशं व्यज्यते इति चेन्न तावता च शृङ्गारमहिम्नोऽनतिक्रमात् नह्यत्र शृङ्गा
रेण न प्रतीयत इति अर्थव्यक्तिप्रसादयोरभेदः स्फुट एवोभयोरकष्टेनार्थप्रतीतिरूपत्वात् गुणसंख्यामुपसंहरति अमी दशेति १० निरन्तरैकव
र्णावृत्तिरनुप्रासः व्यवधाने तु प्रायः श्लेष इति नानयोः संकरः माधुर्यलाटानुप्रासयोरपि न संकरः लाटानुप्रासेऽभिप्रायभेदस्य वीजत्वात् अ

८ ४
चं॰ लो॰
टी॰

अ▒तिशयमात्राविवक्षायामलत्वात् एवमन्यत्राप्यन्तर्भाव एषां गुणानामपसारणीयः भूषणमाह तिलकेति यथा स्त्रीणां तिलका
दं भूषणमलङ्कारात्ताटंकादेर्भिन्नं तथा काव्येप्युपमादिभिन्नं भूषणमस्तीत्यर्थः ११ विचित्रेति विचित्रं चित्रकाव्यं सर्वतोभद्रसंदेपो
क्तिपितियावत् यत्रतादृशस्य प्रयोगस्य न्यासः सः न्यासः यथोदरंभरयस्त्रकोरा इत्यादिनिर्वाहः सोहमाजन्मशुद्धानामित्यादौ
उदाहरणेन त्याभिधापि शब्दप्रयोगः प्रौढिः यथा मन्दाक्रान्ता विस्तृतिरसंनेद्धुयष्टिः समग्रमित्यत्र लद्यायामंदाक्रान्तायाः जे
चितौ वागर्थौवित्याद्यैफलत्वेन प्रकृताभ्यां वागर्थाभ्यां तमस्योपमेयभावस्योचितत्वात् प्रागल्भ्यान्तरेति जागृष्टवद्दरवटकेत्या
दौ संगीतशास्त्रसिद्धस्य हस्तकरिप्रोक्तस्य खटिकामुखेत्यनेनोपादानात् संग्रहः शृङ्गारीगिरजाननेत्यादौ अत्र शृङ्गारादीनां सं
ग्रहः दिगित्यनेन भूषणान्तरमप्यस्तीति सूचितं १२ श्रीवीरभद्र भूपतिलकनिदेशेन यत्नेन चन्द्रालोकमयूखो रचितः सार्थस्तुर्येयं इ
तिशारदागमे चतुर्थो मयूखः ४ अथालङ्कारसामान्यलक्षणमाह शब्दार्थयोरस्य च मनोहरः सन्निवेशोऽलङ्कारः ननु कुण्डलादिवत्
एवमभूतः अनुप्रासादेः शब्द एवान्तर्भावात् एवं च हारादिवदिति दृष्टान्तोनुसर्वांशेपितु रमणीयताधानमात्रे गुणादयोपि मनोहरस
न्निवेशरूपाः किन्नालङ्कारा इतिचेत् कवेरलङ्कारत्वेन प्रसिध्यालङ्काराणां गुणादिभ्यो भेदात् न केवलं प्रसिद्धेवालङ्काराः अपितु कवि
प्रौढ्यापूर्वा चार्थोपरिगणिताः अपि कतिचिदलङ्कारा इत्याह कवेः प्रौढिवशेनेति एवं चालङ्कारत्वेन प्रसिद्धाः कतिचिदलंकाराः

८

विशेषेषु प्रथमं शब्दालङ्कारेषु छेकानुप्रासमाह स्वरव्यञ्जनेति अनु एकदा कथनोत्तरं यत्र त एव वर्णाः प्रकर्षेण न्यस्तास्ते सोऽनुप्रासः छेकानुप्रासस्तु छे
कानां दिग्धानामनुप्रासः स च व्यञ्जनानामेव नानास्वरस्तोमानां व्यूहेनावृत्या भवति उदाहरणमयमेव श्लोकः दोहेत्यावृत्तेः सत्वात् जगदित्यादौ
स्वरभेदेऽपि जकारगकारव्यञ्जनसानुप्यात् सेकाइत्यत्र स्वरस्तोमावृत्तेरपि सत्वात् एकाराकारयोरावृत्तेरपि सत्वात् श्लोकान्वयस्तु यागौ वर्णानांस्व
रव्यञ्जनयोर्यः सन्दोहस्तोमस्तद्व्यूहात् तद्विशिष्टात् तदावृत्तिमतो सा छेकानुप्रासेन शोभमाना जगति जागर्त्युत्कर्षः मदोपकुह स्त्द्दोहदेतिर
आवृत्तेति यद्वचः केवलवर्णावृत्त्या संपूर्णसंसरितं तत्रानुप्रासो यथा मन्देत्यादौ केवलदकारवृत्तिसत्वात् यत्रानुपूर्व्यादिविशेषविशिष्टनानाव
र्णावृत्तिस्तत्र छेकानुप्रासः यत्र केवलस्य वर्णस्य तत्र वृत्त्यनुप्रास इत्यर्थः ३ लाटेति यत्राभिप्रायभेदेनोक्तस्यैव शब्दस्य प्रयोगः स लाटे इव प्रास्य विच
क्षणविशेषवल्लभत्वाल्लाटानुप्रासः उदाहरणं यथेति अत्र हितो यं जितं सफलमित्यभिप्रायभेदात् ४ स्फुटानुप्रासमाह श्लोकेतियो वर्णः प्र
थमार्द्धावसाने स एव चरमार्द्धावसाने इत्येकः चतुर्षु चरणावसानेषु एको वर्ण इत्यपरः एवमष्टमांशेऽपि प्रान्तवर्णसाम्येन भेदो द्रष्टव्य इति भावः ५
अर्थानुप्रासमाह उपमेयोपमानादाविति उदाहरणं चन्दनमिति नात्र छेकानुप्रासादिविवसाम्यकृतं रमणीयत्वं चन्दनचन्द्रयोर्व्यवधानस्य स
त्वात् नापि स्फुटानुप्रास इव नियतवर्णावृत्त्या किन्त्वर्थसान्निध्येन तत्र चारुता आवृत्ते चन्दनचन्द्रयोरुपमानोपमेयभावेन संनिधेः सत्वादिति
भावः ६ पुनरुक्तप्रतीकाशमाह पुनरुक्तप्रतीकाशमिति यत्रापाततएकोऽर्थः प्रतीयते स पुनरुक्तप्रतीकाश इत्यर्थः अत्रांशुभिः कांतमाकाशं
तमिति द्वयोरर्थभेदेऽपि अंशुकान्तमम्बरान्तमित्यत्रैकार्थप्रतीतेरिति भावः ७ यमकमाह अव्यक्तवर्णेति वर्णानां समूहो यत्र सर्वथा समस्तावर्त्यते

९ 9

चं॰ लो॰ टी॰

तत्रयमकं यथा त्रैवलवकं माधुर्यमितिकवेः स्तुतिकंदस्याङ्कुरं प्रथमाविदुः धुर्यमाधुर्यवचसइति यमकस्यापरे प्रभेदाः ग्रन्थान्तरादनुसर्त्तव्याः इदं
तु अन्त्यादियमकम् ८ चित्रकाव्यं खड्गबन्धादिभेदभिन्नं तत्र खड्गबन्धमुदाहरति काव्यं विस्रव रीतिकामिनीवेति अमुनाश्लोकद्वयेस्थलविशेषरहिता
क्षरेण खड्गबन्धो भवति स लेखनक्रमो लिखितखड्गबन्धादवसेयः यत्संख्याकवर्णवृत्त्या अस्य खड्गबन्धौ तामपि ग्रन्थान्तरादवसेयं बन्धान्तरं तु मूलएवोप
चितत्वादस्माभिरुपेक्षितमिति कामिनीचारुकरालिकं यस्याकाश्मीरसेकेन रक्ताङ्गी खड्गपक्षे चारुकरालिका च काश्मीरदार रक्ताङ्गीत्यभिप्रायः ९ अ
र्थालङ्कारे प्रथममुपमामाह उपमायत्रेति यत्र द्वयोः पदार्थयोः सादृश्यं प्रतीयते तत्रोपमा कयोरिव स्तनयोरिव उदाहरणमप्येतदेव द्वयोरित्यनेनोप
मेयस्तनयोरिवेत्यनेनोपमानस्य प्रतीताविवेत्यनेन प्रतीयमानसादृश्यविशिष्टसादृश्यप्रतीतेरितिभावः ११ अनन्वयमाह उपमानोपमेयेति
यत्रोपमानोपमेययोरभेदः यथा इन्दुरिन्दुरिवेत्यत्रानन्वयः १२ प्रतीपोमाह विख्यातस्येत्यादि यत्रोपमानमेयता यथा इन्दुः मुखमिवेत्यत्र सा प्रती
पोपमेत्यर्थः १३ ललितोपमामाह उपमानेत्विति यदोपमेयेउपमानलीलावर्ण्यते तदा ललितोपमा आलोयुक्त इत्यर्थः तन्नेत्रेणोदाहरणं उस्तवको
पमामाह मिलितोस्मीपति यत्रानेकयोरुपमानोपमेययोः सादृश्यं तत्र स्तवकोपमा यथा श्रित इत्यादौ तत्र सापेक्षया भृङ्गः श्रीपतिचरणापेक्षया तामरसा
वुपमानत्वेनोपात्तावित्युपमानोपमेययोरनेकत्वं तत्र पर्युमस्योपमानोपमेयरूपस्येतिभावः १५ संपूर्णोपमामाह स्यात्संपूर्णोपमेति यत्रोपमानोपमेययो
र्द्वयोरपि विधेयता सा संपूर्णोपमा यथा पद्मानीवेत्यादौ अत्रोभयोरप्यासन्निति क्रियान्वयेन विधेयत्वात् १६ रूपकमाह यत्रोपमानेति यत्रोपमेयमयीभित्ति
रूपोपमानचित्रेण सर्वथोपरज्यते तद्रूपकं उदाहरणमप्येतदेव उपमानमेवाचित्रमिति उपमेयमप्येवभित्तिरिति रूपकप्रतीतेरित्यर्थः यत्रोपमानोप
मेययोर्भेदेन प्रतीयते तद्रूपकमिति भावः १८ सोपाधिरूपकमाह समानधर्मयुगिति यत्र समानधर्मयुक्त उपमानवाचकशब्दप्रयोगस्तत्र सोपाधिरूप

कमिति रूपणीयस्थाने रूपकाभिधानं मुखं चन्द्र इत्यादौ अत्र तु रूप्यरूपकसाधारणधर्मस्पर्शान्ते उल्लिङ्गेत्यादिनोभयसाधारणधर्माभिधानोत्तरं पुरस्
र इति रूपकाभिधानादिति भावः साध्यारोपात् कथनात् उल्लिङ्गेत्यादावुभयभेदेनोभयसाधारणधर्मप्राप्तिः स्फुटैव १८ यत्र सादृश्यं प्रपञ्च्यते तत्साद
श्यरूपकं ज्ञेयमित्यर्थः उदाहरणं उल्लसदिति अत्र पंचषाखंचसाधर्म्यं प्रपञ्च्यते न तु सोपाधिकं रूपक इव रूपकपदं निकट इति भावः १९ आभासरू
पकं रूपितरूपके आह स्यादिति यदितीत्यादि किंचिद्रूपकं रूपान्तरं न सहते यथा कुचकलशकोकयुगलमिति कलशकोकयोरेकरूपकस्यैवरसत्वात् किं
चित्तु सहते यथा अङ्गयष्टिधनुर्वल्लीमादाय मकरध्वजः जगज्जयति यासां ताः कथं न सरसाः स्त्रियः इत्यादौ अङ्गे तां गधनुर्वल्लीत्वरम्यं लिंगासं
गतेः एवं यत्र रूपितरूपकं सहते तत्राभासरूपकमित्यादि २० परिणाममाह परिणाम इति यत्र रूप्यरूपकयोर्व्यवधानेनाधनं परिणाम इति यथा मौनमु
द्रमिति तत्राभेदः प्रतीयते तथा नात्र किं तु वाक्यमहिम्ना विलम्बेनेति परिणामोयमित्यर्थः प्रकृतोदाहरणे एवशब्देन व्यवधानं द्रष्टव्यं २१ उल्लेख
नमाह बहुभिर्बहुधेति यत्रैकस्मिन्ननेककर्तृकोनेकधर्मारोपस्तत्रोल्लेखः यथा स्त्रीभिरित्यादौ अत्र स्त्रीभिः प्रियैः शत्रुभिः कामत्वचन्द्रत्व
कालत्वारोपादित्यर्थः २१ अपह्नुतिमाह अतथ्यमिति यत्रातथ्यस्यारोपणाय तथ्यस्य निरसनं क्रियते सापह्नुतिः यथा नायमित्यादौ अत्र स
रोरुहत्वस्यारोपणाय विद्यमानस्य चन्द्रत्वस्य निषेधादित्यर्थः २२ पर्यस्तापह्नुतिमाह पर्यस्तापह्नुतिरिति पूर्वत्र चन्द्रमसि सुधांशुत्वधर्मनि
षेधे सरोरुहत्वमारोप्यते अत्र तु नायं सुधांशुरिति सुधांशुत्वनिषेधे प्रेयसीमुखे सुधांशुत्वारोपनन्वेवं प्रकृते धर्मिणि विद्यमाने धर्मो
निषिध्यते धर्म्यन्तरे समारोप्यते सा पर्यस्तापह्नुति यत्र तु धर्मिणि विद्यमानं धर्मं निषिध्य धर्मान्तरारोपः सापह्नुतिः एवं च पर्यस्तापह्नु

१० 10
चं. लो.
टी.

तौ धर्मिनिषेध कृ स्यमिति चेन्न प्रकृते धर्मधर्मत्वनिषेध एव तात्पर्यात् तस्य प्रकृतोदाहरणेस्फुटत्वात् अयं सुधांशुर्न किंतु प्रेयसीमुखंसुधांशुरिति प्रतीते र्जायमानत्वादितिभावः २४ भ्रान्तापह्नुतिमाह भ्रान्तापह्नुतिरिति यत्र कस्यचित् भ्रान्त्यान्यत्वारोपयति परस्तत्त्वकथनेनैतन्निषेधयति तद्भ्रान्तापह्नुतिरित्यर्थः अन्येनान्यस्मिन्नारोप्यमाने यत्र तत्त्वनिर्णय इत्यर्थः उदाहरणं तापइति कस्याश्चित्शरीरे सोत्कंपं तापमुपलभ्य काचिदित्यंशंकते स्मरादन्यतोपि तापो भवेति तत्किं सोत्कंपं पश्यास्यास्तया तवशरीरेज्वर इतिपरस्त्वाह न स्मर इति अत्रातथ्याज्वरनिरासेन तथ्यस्मरव्यवस्थापनात् २५ छेकापह्नुतिमाह छेकापह्नुतिरिति यत्र परभीत्यान्यारोपस्तथ्यनिरासः साछेकापह्नुतिरित्यर्थः उदाहरणं प्रजल्पन्नितिमत्पदेलग्न इति तयोक्ते कान्तः किमिति अन्ययोक्ते भीता सान्नूपरारोपणेनतथ्यं कान्तमपलापयतीत्यर्थः २६ कैतवमाह कैतवमिति व्याजाद्यैः पदैरपह्नुतेर्व्यज्यमानत्वे कैतवापह्नुतिरिति उदाहरणं निर्यान्तीति अत्र कैतवादित्यनेन दृक्पातनिह्नवः २७ उत्प्रेक्षामाह उत्प्रेक्षेति यत्र तथ्यनिषेधं विना तथ्यारोपः सोत्प्रेक्षा अपह्नुतिस्तु तथ्यनिषेधेसतीति भेदः यत्रापह्नुतिनिषेधं विना हेत्वादिरुन्नीयते साउत्प्रेक्षा त्वन्मुखेति अत्रस्वभावसिद्धेपद्मेऽस्वन्मुखसेवैरत्वन्मुखेत्यादिना हेतुरुत्प्रेक्षितसा उत्प्रेक्षा मम शोकं केवलानपर्यान्नेति पद्मशोभाग्रहणाय तेन वैरं करोतीत्याशयः २८ लुप्तोत्प्रेक्षामाह इवादिकपदाभाव इति इयमुत्प्रेक्षा नूनमिति पदस्योत्प्रेक्षाव्यंजकस्य सत्त्वादसहाव्यंजकसहिता तु गूढेत्याह उदाहरणं यत्कीर्तिरिति अत्राशेषभुवनपर्यटनरूपविलासमांसलाः कीर्तिः गङ्गावगाहनमुत्प्रेक्ष्यते न च तत्र पर्यंकेध्रुवं मन्ये नूनमित्येवमाद्याः प्रायोव्यंजकाः सन्तीतिभावः २९ स्मृति सन्देहावाह

१०

स्यात्स्मृतिरिति स्मृतिभ्रान्तिसन्देहेषु यत्र यद्वर्ण्यते तत्र स एवालङ्कारः पङ्कजमिति सदृशवस्तुदर्शने सदृशान्तरस्मरणादित्यर्थः ३० अयमिति
अयमित्यत्र पूर्वार्द्धे मधुपभ्रमः उत्तरार्द्धे तु संसन्देहो वर्णित इत्यर्थः ३१ मीलितमाह मीलितं यदीति यत्र सदृशवस्तुना प्राधिक्येनाभिभूतं सदृशान्तरं
स्वरूपत एव नोपलभ्यते तन्मीलितं ३२ सामान्यमाह सामान्यं यदीति यत्र समसदृशतया स्वरूपोपलम्भेऽपि न वैधर्म्योपलम्भस्तत्सामान्यमित्यर्थः ए
कत्र नालादिस्वरूपतः एकत्र नालादिविशेषतः ३३ उन्मीलितमाह हेतोः कुतोऽपीति केनचिद्धेतुना विशेषे ज्ञाते भिन्नतया या स्फूर्तिस्तदुन्मीलितं अत्र
चन्द्रेण संकुचितेषु पद्मेषु मुखानां भेदधीरित्यर्थः ३४ अनुमानमाह अनुमानं चेति अत्र स्मितेन कार्येण तस्या अन्तःस्थिताभिलाषकारणमनु
मीयते इत्यर्थः ३५ अर्थापत्तिमाह अर्थापत्तिः स्वयमिति अत्रैकस्य सिद्ध्यार्थान्तरमर्थात्सिध्यति सार्थापत्तिः यथोत्कृष्टचन्द्रजयवर्णनेऽपकृष्टपद्म
जयो मुखस्येति भावः ३६ काव्यलिङ्गमाह स्यात्काव्यलिङ्गमिति यत्र कृतनस्यार्थस्य समर्थको वाक्यार्थः पदार्थो वा तत्काव्यलिङ्गं यथा स्मरजयसमर्थकः
स्मरहरस्य हृदि सद्भाव इत्यर्थः अत्रास्ते हृति न त्वस्मरः इति भावः ३७ परिकरमाह अलङ्कारः परिकर इति अत्र सुधेत्यादिविशेषणं साभिप्रायं शी
तलाम्बितेन तापोपशान्तेः संभवादित्यर्थः ३८ परिकराङ्कुरमाह साभिप्राय इति अत्र चतुर्भुज इति विशेष्यं साभिप्रायं दानसाधनानां भुजानां देयसमसं
ख्यत्वे युगपद्दानसंभवादिति भावः अक्रमातिशयोक्तिमाह अक्रमातिशयोक्तिरिति अतिशयोक्तिश्चतुर्धा तत्र कार्यकारणयोर्यौगपद्येऽक्रमातिशयोक्तिः
यथा आलिङ्गनीत्यत्र मौर्वीशरसंबन्धः शत्रूणां मस्तकच्छेदकारणं तयोर्यौगपद्यं ज्याशब्देन मौर्व्याः शिरोग्रहणं ४० अत्यन्तातिशयोक्तिमाह अत्यन्ता
तिशयोक्तिरिति यत्र कार्यमेव पूर्वमुच्यते सात्यन्तातिशयोक्तिः यथा अग्रे मानगमनं पश्चादनुनयनं पौर्वापर्यव्यतिक्रम इतिभावः ४१ भेदकातिशयोक्ति

॥ ॥

चं॰ लो॰ टी॰

माह भेदकातिशयोक्तिरिति अत्र तस्मादेव तस्य भेद उच्यते सा भेदकातिशयोक्तिर्यथा अहो इत्यादौ लावण्यलीलात एव भेदप्रतिपादनादित्य
र्थः रूपकातिशयोक्तिमाह रूपकातिशयोक्तिरिति यत्र रूपकान्तःस्थितं रूपं तत्र रूपकातिशयोक्तिः यथा पश्येत्यादौ अत्र नीलोत्पलशर
भ्यां रूपकाभ्यामेव लोचनकटाक्ष रूपस्य प्रतीतेः पृथक् पदेनानभिधानादित्यर्थः ४३ तत्रासमर्थस्य तत्सामर्थ्यवर्णने प्रौढोक्तिः यथा
स्फटिकस्थिते जलप्रौढे त्वे इत्थं यदि स्यात्तदेत्थं स्यादिति संभावनं यथा स्फटिकस्थिति प्रोतजलसिक्त मौक्तिक प्रस्तुतालनाचे स्यात्तदा
नस्य छेदः समं तेयशः स्यादित्याह प्रौढोक्तिरिति ४४ प्रहर्षणमाह वांछितार्थेति यत्र वांछितार्थादधिकमाप्तिर्वर्ण्यते यत्नेन तत्र प्रहर्षणं
यथा दीपोद्योतनिर्माणे पमवर्णने सूर्योदयवर्णनमित्यर्थः ४६ विषादनमाह इष्यमाणेति इष्यमाणविरुद्धार्थो यत्र प्रतीयते तद्वि
षादनमित्यर्थः ४७ तुल्ययोगितामाह क्रियादिभिरिति यत्रानेकस्यैक क्रियादिभिः संबन्धस्तत्र तुल्ययोगिता यथा संकुचन्तीत्यादौ अत्र
चन्द्रोदये पद्मस्वैरिणीवदनयोः संकोचवर्णनादित्यर्थः संकुचन्तीति तुल्ययोगितायां प्रस्तुतानामेवैकक्रियासंबन्धः पङ्कजानामिव स्वै
रिणीमुखानां तथा प्रस्तुतत्वात् ४८ दीपकमाह प्रस्तुताप्रस्तुतानां च तुल्यत्वे सति दीपकं मेधां बुधः सुधामिन्दुर्विभर्त्ति वसुधां भवान्
४८ दीपके प्रस्तुतयोस्तुल्यत्वमित्यर्थः अत्र राजैव प्रस्तुतः ४९ आवृत्तिदीपकमाह आवृत्त इत्यादि क्रियावाचकपदा[illegible]वृत्ति दीपकं यथा
दीप्तेत्यादि ५० प्रतिवस्तूपमामाह वाक्ययोरिति यत्र वाक्यार्थयोः साम्यं तत्र प्रतिवस्तूपमा यथा तापेनेति अत्र तापेन जैह्म्येन सूर्यो राजते इति

प्रथमो वाक्यार्थः धनुर्बाणरूपेण जनते इति द्वितीयः अनयोः साम्यं प्रतिवस्तूपमा अत्र तापधनुषोः स्मरसूर्ययोः क्षोभयोः परस्परं साम्यात् एवं च यत्र वा
क्यद्वयगतानां पदार्थानां सर्वेषां परस्परं साम्यं तत्र प्रतिवस्तूपमेति सारं ५१ दृष्टान्तमाह चेद्बिम्बप्रतिबिम्बत्वे इति संग्रामोद्दामहुंकृतिमाह सामदेतिवि
म्बप्रतिबिम्बभावश्चेत्तदा तयोर्दृष्टान्तालङ्कृतिः मल्लप्रतिमल्लत्वे तयोः संग्रामोद्दामहुंकृतिः माहिरित्यर्थः यथा बिम्बप्रति[illegible]योरेकाच्छाया तथा यत्र वाक्या
र्थयोरेकाच्छाया भवति तत्र बिम्बप्रतिबिम्बभावः तयोर्यथा प्रकृत एव श्लोके तथा हि बिम्बप्रतिबिम्बभावश्चेद्वाक्यार्थ[illegible]तयोर्दृष्टान्त[illegible]लङ्कृतिः स्यादि
ति पूर्वार्द्धार्थः मल्लत्वप्रतिमल्लत्वे चेद्भवतस्तदा संग्रामोद्दामहुंकृतिरलङ्कृतिः स्यादित्युत्तरार्द्धार्थः अनयोः समप्रत्ययत्वमस्त्येव चेदितिस्यादिति प्र
सावलङ्कृतिरितिह्वि वचनस्य चोभयत्रान्वयात् ईदृशेस्थले दृष्टान्तोलङ्कृतिरितियुक्तमेव यथा संग्रामोद्दामहुंकारो मल्लादिष्वलङ्कारस्तथाप्र
कृते दृष्टान्त इति दृष्टान्तदार्ष्टान्तिकभावस्य स्फुटमवभासनादुदाहरणान्तरमाह दृष्टान्तश्चेति ५२ जाता चेदिति कस्यचिद्गवद्भक्तस्य नारायणं प्र
त्युक्तिः हृदि भक्तमूर्तिश्चेद्दृष्टा इत्यादिरर्थः ५३ निदर्शनामाह वाक्यार्थयोरिति यत्र सदृशयोर्वाक्यार्थयोरैक्यारोपः सा निदर्शना यथा येत्यादि दात
सौम्यता चन्द्राकलङ्कः तयोर्वाक्यार्थयोः संभावितत्वेन समयोरैक्यारोपस्य स्फुटत्वादिदमुभयमपि समत्वेनैकमित्यर्थः ५४ व्यतिरेकमाह व्यतिरेक[illegible]उपमा
नापेक्षया उपमेयस्य उपमेयापेक्षया उपमानस्य विशेषो व्यतिरेकः यथा हवेत्यादौ अम्बुन्नतत्वेन साम्ये सति कोमलत्वेन विशेषोपादानादि[illegible] ५५ सहो
क्तिमाह सहोक्तिरिति जनमनोहारी यत्र सहभावस्तत्र सहोक्तिः यथा दिगन्तमित्यादि पुत्रेण सहागत इत्यादिवारणाय जनमनोहारिणीति अत्र चमत्कारविशे
षाभावादित्यर्थः ५६ विनोक्तिमाह विनोक्तिश्चेदिति केनचिद्विना यत्र प्रस्तुतहीनता तत्र विनोक्तिः यथा विनयं विना विद्यायाः ५७ समासोक्तिमाह समासो
क्ति।

क्तिरिति यत्र प्रस्तुतवर्णनेनैवाप्रस्तुतमवगम्यते सा समासोक्तिः यथा यमित्यादौ अत्र प्रस्तुतविशेषणमहिम्नैव कामिनीमुखचुम्बनस्य प्रतीतिरित्यर्थः ख
ण्डश्लेषमाह खण्डश्लेष इति यत्र पदं प्रत्येकं भिन्नार्थं स खण्डश्लेषः यथोच्छलदित्यादौ अत्र कीलालपदस्य रुधिरजलपरत्वात् वाहिनीपतिशब्दस्य सेनापतिस
रित्पतिपरत्वात् ६० भङ्गश्लेषमाह भङ्गश्लेष इति यत्रार्थद्वयं पदसमुदायस्य स भङ्गश्लेषः यथा अजरेत्यत्राजरतामरता च अजेरामरयोः रता चेत्यर्थद्वयस्य
समुदायेनाव्ययेरिति यथायोग्यं पुरी अजरामरयोः रता प्रिया न याजरामरभावः कस्यचित्प्रियप्रतिभावः अत्र यस्य पदस्यैकोऽर्थस्तस्यैव नापरः अपि तु समुदायेनार्थद्वयं प्रत्याय्यते इति
सभङ्गश्लेष इत्याशयः ६१ अर्थश्लेषमाह अर्थश्लेष इति यत्र विशिष्यपदयोर्भिन्नयोरर्थयोर्विशेषणपदार्था अभिन्नाः अनेकेऽन्विताः सोऽर्थश्लेषः यथा कटाक्षकुन्तलयोः कुटिल
त्वादयः ६२ अप्रस्तुतप्रशंसामाह अप्रस्तुतप्रशंसेति यत्राप्रस्तुतप्रशंसा प्रस्तुतकथा प्रस्तुतानुगाः प्रस्तुते पर्यवस्यति सा अप्रस्तुतप्रशंसा स्यात् यथा कमले इत्यादि अत्र प्र
स्तुतानां धनवतं कथनाया प्रस्तुतकमलकथेत्यादि ६३ अप्रस्तुतप्रशंसाभेदानाह कार्येत्यादि यथा च कार्ये प्रस्तुते प्रस्तुतकारणाभिधाने कारणे कार्याभिधानं विशेषे सामान्य
स्य सामान्ये विशेषस्याभिधानमिति रूपात्त्र व्यवसायिना किमपि न दुःकरमिति सामान्ये प्रस्तुते पयमुधेरिति विशेषस्याभिधानमित्यर्थः अर्थान्तरन्यासमाह भवेदर्थान्तरन्या
स इति यत्र मुख्येनार्थेनानुषक्तं सहितं अर्थान्तरमभिधीयते सोऽर्थान्तरन्यासः उदाहरणं हनुमानिति अत्र दुष्करं किं महात्मनामिति मुख्यार्थस्तत्सहितं हनुमानित्यादीम
हितं यदनुषक्तं मुख्यार्थस्य साधकं उक्तं दुष्करं किं महात्मनामित्यस्य हनूमानित्यनेन साधनात् ६४ विकस्वरमाह यस्मिन्निति यस्मिन्नपयतो विशेषः पश्चात्सामान्यं ततो
विशेषः स विकस्वरोऽलङ्कारः यथा स न जिग्ये इत्यादौ अत्र कनकितसकलविक्रान्तो न जिग्ये न जित इति विशेषः महान्तो दुर्धरा इति सामान्यं क्ष्माधरा इति विशेषः
६५ पर्यायोक्तिमाह कार्याद्यैरिति प्रस्तुते कार्याद्यैर्यत्र प्रस्तुतमेव कारणाद्युच्यते तत्र पर्यायोक्तिः यथा तृणानीति अत्र तृणेन कार्येण प्राक्तृणमुत्पादनं कारणमु
च्यते अत्रोभयोः प्रस्तुतत्वात् नाप्रस्तुतप्रशंसासंकरः ६६ व्याजस्तुतिमाह उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः इति निन्दया स्तुतेः स्तुत्या वा निन्दा

जे

या उक्तिर्व्याजस्तुतिः एकत्र व्याजेन स्तुतिः परत्र व्याजरूपा स्तुतिस्तत्राद्या कस्त्वमित्यादौ अत्र गङ्गाया निन्दाव्याजेन स्तुतिः अत्र निन्दा स्तुतिपर्यवसन्ना द्विती
यां स्तुतिर्निन्दापर्यवसन्ना यथा खलाः किल कलौ केवलं न तत्त्वज्ञाः ये मौनमौज्झं मुञ्चन्ति न कदाचित्परस्य वेद इति ६७ आक्षेपमाह आक्षेप इति
अयुक्तस्य यो विचारस्तत्प्रतिषेधः स आक्षेपः यथा चन्द्र इत्यादौ अत्र प्रथमतश्चन्द्रदर्शनं विधिः पश्चात्प्रियामुखे जयिनि सति नोचितमिति प्रतिषेधः ६८
गूढाक्षेपमाह गूढाक्षेप इति यत्र विधिः स्फुटो निषेधस्त्वस्फुटः स गूढाक्षेपः यथा सीताहरणोन्मुखं रावणं प्रति मारीचोक्तिः अत्र ह
हरेत्यादिना विधेः स्फुटत्वात् चिन्तयेत्यादिना मृत्युभयदर्शनेन निषेधस्यास्फुटत्वात् ६९ विरोधमाह विरोध इति यत्र द्र त्यादि
व्यगुणक्रियादीनां परस्परं विरोधस्तत्र विरोधः यथा चन्दनस्य देहदाहकत्वमिति ७० विरोधाभासमाह श्लेषादिभिरिति य ६६२
त्र श्लेषवक्रोक्तो विरोधस्तत्र विरोधाभासः यथा अपीत्यादौ अन्धकस्यारिरिति विरोधाभावे अन्धकारवानित्यर्थे विरोधस्यास्फुटत्वात् तात्पर्य
विषयीभूतायामभिन्नस्य विस्तारार्थस्य प्रतीयमानत्वादन्धकारविशिष्टेन प्रकाशासंभवादित्यर्थः ७१ असंभवमाह असंभव इति यत्रा
र्थनिष्पत्तौ इदमसंभावितमनेन कृतमिति प्रभृति वर्ण्यते सो असंभवः यथा स्वल्पवयसा नारीयणेन गोवर्द्धने करेण ... ते सति को वेद इत्यादिना
गोपानामुक्तिः ७२ विभावनामाह विभावनेति यत्र कारणं विना कार्यनिष्पत्तिर्वर्ण्यते सा विभावना यथा पश्येत्यादौ अत्र लाक्षायोगकारणाभावे
पि चरणयो रक्तता कार्यं वर्णनादित्यर्थः रसासिक्तौ रसैः सिक्तं ७४ विशेषोक्तिरिति कारणे सति कार्यानुत्पत्त्या विशेषोक्तिः यथा न मन्त्र
मित्यादौ ततोऽपि ... तु शक्यते स्वर्वत्वात् न तत्र नृपे कारणे सत्यपि लङ्घनरूपकार्याभावः ७५ असङ्गतिमाह आख्यातभिन्नदे

१२ 13

चं॰ लो॰ टी॰

शात्विमिति यत्र कार्यहेत्वोर्वैयधिकरण्यं वर्ण्यते तत्रासङ्गतिः यथात्वदित्यादौ अत्र नमितस्य कारणस्य भङ्गांगे वर्णनात् कार्यस्य भङ्गस्य
भवक्रमे वर्णनादिति यत्र भिन्नो देशो न ख्यातस्तत्रैव वैयधिकरण्ये सङ्गतिः यत्र तु ख्यातस्तत्र नासङ्गतिः यथा भ्रूचाप
वल्लीमुमुखीया बन्नयति वक्रतां तावत्कटाक्षविशिखैर्विभिद्यते हृदयं मम इत्यत्र वक्रतारूपस्य कारणस्य धनुर्वल्ल्यभेदस्य च
कार्यस्य भेद एव दृष्टत्वेन वैयधिकरण्यस्यैव ख्याततया नासंगतिरिति भावः ७६ विषममाह विषममिति अनुचितयोर
न्वयवर्णनं विषमं यथा चन्दनं भुजङ्गमयोरित्यर्थः ७७ सममाह सममौचित्यमिति उचितत्ववर्णनेन समं यथा हारे
ण स्तनमण्डलमिति विचित्रमिति यत्रैकार्यानुकूलः प्रयत्नस्तद्विरुद्धफलप्राप्तिं सृजति तत्र विचित्रं यथा नमन्ता
उन्नतिमाप्ताविति ७८ अधिकमाह अधिकमिति यत्राधारस्याधिक्यमुपवर्ण्याधेयस्याधिक्यमुपवर्ण्यते तत्रा नुमाधिक्य
धिकं यथा जगद्व्याप्यावाचामाधाराणामाधिक्यमुक्त्वाधेयमाधाराणामाधिक्यवर्णनमित्यर्थः ७९ अ नाम
न्योन्यमाह अन्योन्यमिति यत्र द्वयोः परस्परमुपकारकत्वं तत्रान्योन्यं यथा निशा शशिनौ परस्परं शोभाधायकत्वा
त् ८० विशेषमाह विशेष इति प्रसिद्धमाधारं विनाधेयवर्णनं विशेषः यथा विनाभास्वन्तं तत्किरणवर्णनमित्यर्थः ८१
व्याघातमाह स्याव्याघात इति यज्ञातत्क्रियासमर्थतदन्यक्रियासमर्थत्वेन वर्ण्यते तत्र क्रियायोर्विरोधे व्याघातः

यथाप्रीतिसमर्थैः कुसुमैर्मोरणमित्यर्थः ८२ कारणमालामाह कारणमालेति यथा प्राक्कारणैर्यथा प्राप्तं कारणैरुत्त
